# जानकीपते

## रागम्ः खरहरप्रिय    ताळम्ः आदि

(श्री पापनाशं शिवन्)

**पल्लवि**

जानकीपते जय कारुण्यजलधे जय
कौसल्यानन्दवर्द्धन जगदभिराम पट्टाभिराम

**अनुपल्लवि**

दीनजनावन धृत करकङ्कण
दशरथतनयाऽगणित गुणगण

**चरणम्**

गुह जटायु शबरीप्रमुख निजभक्तजनमुक्तिदायक
जगदहित विराध कबन्धनिशिचरनिकरनिषीदन सायक - सरो
रुहचरण निहित वालि दशवदन सुरमुनि सद्जनपालक सकल
महितेन्द्र नीलमणि निभशरीर पाहि साकेत नायक श्री

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇